पक्षौ द्वि शून्यकं। साध्यसाधकयोर्वर्णानेकीकृत्य विधानवित्॥ अष्टौ कल्पप्रथमतस्त्रीतर्कं
मुनिबाकुषु। बाणात्स्वयं द्विनागेषु शेषं संमेलयेद्बुधः। साध्यमत्र प्रियेदेवी तुर्ये कोष्ठे परमेश्वरि।
साध्यकोष्ठविनागेन सर्वोक्ते ष्टगंधकैः। विलिख्य यंत्रराजं तु कंठे वा मूर्ध्नि धारयेत्। धार
णाद्द्विषतां द्वेषो भवत्येव परस्परं। इदं हि यंत्रं द्वेषकरं कथितं तव सन्निधौ। गोपनीयं त्वया भद्रे
स्वयोनिरिव सुंदरि॥ ॥इति विद्वेषणं यंत्रं॥ ॥वंध्यापुत्रप्रदं यंत्रं तथाग्रे तु मया मतं। शृणु
तत्रं प्रवक्ष्यामि यंत्रराजं मनोहरं। नारीणां तु महद्दुःखं वंध्याशब्देन वाचितं। तद्दुःखं हरते दे
वि यंत्रराजो मया कृतः। तुर्ये स्वगाणामात्मेन तिथी वा स्वगतिं लिखेत्। द्विःसप्तेरयगताष्टवा शिवः।
जिगतास्वरालिके। मंत्री गत्वा स्वगत्या च प्रथमे पूरयेत्सुधीः। तदंकान् गजगत्या च नाग ॥१८॥
कोष्ठानि संलिखेत्। सर्वे तान्नूनमंकेन विपरीतं समाश्रयेत्। साध्यं० अष्टौ कल्पे च पूर्वोक्त विधा
नेन लिखेत्सुधीः॥ साध्यमध्यवरारोहे नित्यक्लिन्ना परात्परा। पूर्वोक्ते धारयेदुदरे कण्ठायो षि

तो गर्भधारणात्। यावदुत्पद्यते जंतुस्तावद्यंत्रं तु धारयेत्। पश्चाच्छिशोः कंठदेशे बंधनीयं
प्रयत्नतः। इदं यंत्रं धर्मकामस्य मोक्षैकसाधनं। संधतानं लभते वंध्या सत्यं सत्यं वचो मम।
॥इति वंध्यापुत्रप्रदं यंत्रं॥ ॥शत्रुमर्दननामानं यंत्रं भद्रे तथा शृणु। महायुद्धे घोरयुद्धे कूट
युद्धे नयावदा पुरा परशुरामेण शिक्षितं यंत्रनायकं। ततो चिरेणातेनैव क्षत्रं दग्धं मनोह
रं। नानारसस्तु वा नानानानानाजयवशाननां। इच्छार्द्धमुनि तं तद्कजगत्पात ततो लिखेत्। साध्य
सा० पूर्वोक्तविधिनालेख्यं वह्निकोष्ठविनिर्दत्तं। साध्यम० कामाक्षा परमेश्वरी॥ पूर्वोक्तेन धा
रयेद्युद्धे वीरे जयो भवति निश्चितं। इदं यंत्रं मया प्रोक्तं सर्वशत्रुविमर्दनं॥ ॥इति शत्रुम
र्दनयंत्रं॥ ॥कन्याप्रदं महायंत्रं शृणु पार्वति सुंदरि। यः पुमान् सुभगां कन्यां विवाहयितुमि
च्छति। तदर्थं यंत्रराजं ते कथ्यते कुतकारकं। रंध्रं रंध्रं कुद्वितीये तृतीये बाणसंज्ञिकं। चतु
र्थे कोष्ठसंलेख्यातं पंचमे चंद्रसंमितौ। षष्ठे नागमितं चांकं सप्तमाष्टस्वरं ध्रकं। नवमं दशमं

रंध्रं शिवे ग्निबाद्दशे रसः। विश्वे मुनिमितं। वलेख्यं भुवने नेत्रसंमितं। तिथौ निकारे रंध्रे तु वि
१९ लिख्य मरमार्थवित्। साध्यसा० विलिख्य परमेशानि गुह्यसारशिवापदे। साध्यम० कौमा
री परमेश्वरी। सर्वोल्केन। ध्वजोपरिष्ठ संधार्यं मनोज्ञां लभते स्त्रियं। इति ते हि समाख्यातं यंत्रं क
न्याप्रदं शिवे। नाभक्ताय प्रदातव्यं देयं नक्तेभ्य एव च॥ ॥इति कन्याप्रदं यंत्रं॥ ॥स्वामिवश्यक
रं यंत्रं प्रवक्ष्यामि समासतः। स्वामी प्रभुः स्त्रीयो भर्त्ता पालको जनकः पिता। ते सर्वे वशमायांति
यंत्रराजस्य लेखनात्। षष्ठे तुर्ये तिथौ वांके वक्रो बाणो दशाग्निषे। षोडशा विश्व संज्ञा ते रुद्रे
नागे ऽक्षि संमिते। सूर्ये मुनौ तथा चाष्ट सप्तमे चक्रमालिखेत्। साध्यसा० अष्टौ कृता समा शिवः।
योज्या सर्वकोष्ठ विभेदतः। साध्यम० कौशिकी परमेश्वरि। सर्वोल्केन धारयेद्वाकु युग्मेन दक्षे ॥१९॥
वामे पुमान् स्त्रिया। धारणाद्यंत्र राजस्य स्वामी वशकरं व्रजेत्॥ इति स्वामिवश्यकरं यंत्रं॥ ॥
परयुद्धकरं यंत्रं शृणु मत्तो वरानने। मनौ सूर्ये सप्तमे च प्रथमे रुद्र संमिते। त्र्यो दशे तथा नेत्रे

ऽक्षे रुद्रे
ऽष्टमे पंच मे पिता। तृतीये षोडशो पंक्तौ वेदे तर्के नवे तिथौ। साध्यसा० मनुको ष्ठाघतो सर्वे स
र्वविधानलः। साध्यमध्य० भ्रामरी कुलिकालिका। सर्वोल्केन धारयेत् स्वपताकायां यंत्रं पुरुनि
वारणं। पलायते महासैन्यं चतुरंगबलान्वितं। इदं ते कथितं नरे यंत्रं युद्धजयावहं। पुत्रायन
क्तिपुत्राय देयं नान्यस्य सुंदरि॥ ॥इति परयुद्धहरं यंत्रं॥ ॥अतः परं वरारोहे यंत्रं गजभय
वहं। तवाग्रे कथयिष्यामि प्रथमं कल्पतः शृणु। सप्तमे प्रथमे देवि मनौ सूर्ये ऽक्षि संमिते। ना
गे रुद्रे विश्व संख्ये शोडशे दशमे तथा। बाणे वक्रो चांकमिते तिथौ तर्ये रसे सुधीः। साध्यसा०
मसकोष्ठा समारभ्य सर्वे सर्वविभेदतः। विलिख्य यंत्र राजं च सर्वोल्केश्चाष्टगंधकैः। धारयेत् सं
मुखे तस्य गजस्य परमेश्वरी। दर्शनात् स्पर्शनात्तस्य विमदो जायते गजः। पलायते यथा देवी वि
ष्णुतो नैव लभ्यते। इदं यंत्रं समाख्यातं राज्ञां हितकरं परं। वनारण्य निवासीनां हितं परमुदाहृ
तं॥ ॥इति गजभयहरं यंत्रं॥ ॥कृत्वा भयहरं यंत्रं संप्रतं वक्षि सुंदरि। येन ज्ञातेन देवेशि

डाकिनी नैव बाध्यते। षोडशे दशमे बाणे वन्हौ नेत्रे ग्रहमे पुनः। शिवो विश्वे लतत्पश्चात् नागगत्याक्षर्
रणं। अंकानां तु विज्ञो मेन विलिखेत् सर्वे सर्वतः। साध्यसा॰ दीनांकतो न्यूनमंकं सर्वोक्तविधि
मालिखेत्। साध्यम॰ देवी शाकंभरी परात् सर्वोक्ते॰ कृत्यानयंत्र न चलति यंत्रराजस्य धारणा
त्। इति हि सिमाख्यातं यंत्रं कृत्यानाशापहं। गोपनीयं॰॥ ॥इति कृत्यानयहरं यंत्रं॥ ॥अथ
वक्ष्ये परं यंत्रं महाग्रहभयापहं। ग्रहाणां रविमुख्यानां बाधा नैव प्रजायते। तमहं संप्रवक्ष्यामि
यंत्रराजं स्तु विस्तरात्। नानारसतुल्ला नाना नानाद्यपवसानना। इष्टार्द्धमुनि लंतं पुग्दसा
शिवैः पदैः। साध्यसा॰। विलिखेत् सर्वे सर्वान् चपयाद्यानां विशालधीः। साध्यमत्र महादेवी चंडि
कापरमेश्वरि। सर्वोक्तैः॥ इदं यंत्रं महाप्राज्ञे तवाग्रे कथितं मया। न देयं यस्य कस्यापि देयं शिष्ये शिवः। ॥२०॥
न्य एव हि॥ ॥इति नवग्रहभयहरं यंत्रं॥ ॥उच्चाटनकरं यंत्रं उच्चोच्चाटनकारितं। तच्छृणुष्व
महाप्राज्ञे यथावत्कथयामि ते। प्रथमे सूर्यकोष्ठे च ब्रह्मेचन वमे पिवा। तिथौ मुनु संख्ये चैवमा

नौ मुनि मिते विधौ। रुद्र येद नयारी त्या यथा कोष्ठांकसंमितं। साध्यसा॰ साध्यमत्र महेशानि देवी क
मलवासिनी। सर्वोक्तैः। धारये त्कंठगं प्राज्ञः सर्वोच्चाटनकारकं॥ ॥इत्युच्चाटनकरं यंत्रं॥ ॥श
त्रु। पीडाकरं यंत्रं इदानीं शृणु भामिनि। प्रथमे च तिथौ नेत्रे मनौ वेदे च भास्करे रसे मुनौ नव
स्वेषु नागे दिक्षु शिवात्मके। पंचमे विश्वकोष्ठेषु वन्हौ पक्षामितं तिको। साध्य॰ विलिखेद् घघ को
ष्ठेषु सर्वे सर्वे विभागतः। साध्यमत्र महेशानि वनदुर्गाप्रकीर्त्तिता। सर्वोक्तैः। शत्रुगेहे गेस्य देहल्यां
यंत्रं तत्र निखानयेत्। अथवा वामबाहौ तु स्वकेतु विधारयेत्। धारणाद्यंत्रराजस्य शत्रोः पि
डा प्रजायते। ज्वरछर्दिः शिरोवर्त्ति गुह्यपीडा महामया। जायंते नात्र संदेहो सत्यं सत्यं वचो मम
इदं यंत्रं शत्रुपीडाकारकं कथितं मया। गोपनीयं॰॥ ॥इति शत्रुपीडाकरं यंत्रं॥ ॥अथ वक्ष्ये
परं यंत्रं जराहरणसंज्ञिकं। यस्य विज्ञानमात्रेण जरापलितवर्जितः। रंध्रं रंध्रं रसवन्हौ रंध्रं रंध्रं
पुनः पुनः। जयाचवशसंख्यातो रंध्रं रंध्रं नवाब्धिपो। साध्यसा॰। नागगत्या लिखेद् देवी सर्वप्र

र्वे विलोमतः। रंध्रसंस्थेषु कोष्टेषु गुह्यसारः शिवापदे। साध्यमन्नहलितापरमेश्वरा। विलिख्य
यंत्रराजं तु सर्वोत्कै। धारयेत्स्वशिरसा मध्ये कूर्चदेशसमाकुलो। धारणाद्यंत्रराजस्य शरीरं दाढ्यं
तां व्रजेत्। आकाशसदृशाकारा। जायंते न्त्रमरोपमा॥ इदं यंत्रं वरारोहे मयाख्यं। निवेदि
तं। गोपनीयं त्वया देवी दातव्यं स्वप्रियाय वै॥ ॥इति जराहरणं यंत्रं॥ ॥अथ वक्ष्ये महेशानि म
हाबलकरं परं। यंत्रराजं चयं ज्ञात्वा नैर्बल्यं नैव जायते। रोकं रोकं रसन्तु त्वा रोकं रोकं पुनः पुनः।
जाया श्वबरासंख्या। तारोकं रोकं न वेत्तु क्षिपे। साध्यं। नागगसा लिखेद्द्विपूर्वं पूर्वं विलोमतः।
रोकसंज्ञेषु कोष्ठेषु गुह्यसारशिवापदे। साध्यमन्विज्ञेया लेखिकापरा। विलिख्य यंत्रराजं तु । शिवः।
सर्वं न जायते बलवान् शघ्रतद्धारयेद्दृढं सदा। नवनागसहस्राणां। बलं तु वातितस्य वै। अ ॥२१॥
जेयस्सर्वमल्लानां पुंसां बालवतां प्रिये। युद्धे जयो नवसेव यंत्रराजस्य धारणात्। इदं ते कथि
तं भद्रे महाबलकरं परं। यंत्रं सर्वार्थदमनं गोपनीयं त्वयानघे॥ ॥इति बलकरं यंत्रं॥ ॥म

हागदहरं यंत्रं शृणु त्वावहिता प्रिये। अष्टौ महागदाश्चान्ये नाशमायांति धारणात्। प्रथमे च
तिथौ शक्रे वेदे कैरसस्संज्ञिके। स्वरेषांके वसौ पंक्तौ रुद्रे बाणे त्रयोदशा वक्रे पक्षे षोडशे च साध
कः। सिद्धिहेतवे। साध्यसा। साध्यमन्नविज्ञया बालसुंदरी। सर्वोत्कै। धारयेत्कंठगं तावद्यावद्रो
गविनाशनं। धारणाद्यंत्रराजस्य रोगायांति दशो दशा। इति गदहरं यंत्रं मयातेपरिकीर्तितं। गोप
नीयं॥ ॥इति गदहरं यंत्रं॥ ॥अथ शूलहरं वक्ष्ये यंत्रं शूलभयापहं। वातशूलं पित्तशूलं कफशू
लं तथा प्रिये। शुष्कशूलं गुल्मशूलं कुक्षिशूलं वापि पार्श्वप्रिये। तस्य वै नाशमायाति यंत्रराजस्य धारणात्।
तान भोनभः। शिवपदे विपलखं चनभो नन्ना। गुगुः सुरानन नंखंचा विलिखेत्क्रमतः पुनः। इत्यादि
मुनितं तेषु गुह्यसारशिवापदे। साध्य सा। विलिखेत्पूर्वं सर्वाङ्ग मध्यकोष्ठविनिर्दलतः। साध्य
मन्विज्ञेया राशामत्वा क्रमात्। सर्वोत्कै। धारयेदुदरे तं हि ततः शूला विमुच्यते। इदं यंत्रं शूलहरं म
यातेकथितं प्रिये। परोपकाराय वपुनरत्त्वया गोप्या सदैव हि॥ ॥इति शूलहरं यंत्रं॥ ॥अथाक

२२

षणयंत्रं तु सर्वार्घपरिहरकं। तमहं संप्रवक्ष्यामि शृणु देवि यथातथं। सुंदरीणां भामिनीनां तथा च
परदेशिनां। हरस्थानो महेशानि स्त्रीणां माकर्षणे परं। नभो नभः शिवपदे वियत्स्वरं च नभो न
भः। गो घुः सुरानभः स्वं च विलिखेत् क्रमशः सुमान्। इत्यादि मुनिनं तं तेषु गुप्तसार। शिवापदेः। साध्य
सा। विलिखेत् सर्वं सर्वाच्च मध्यकोष्ठविनेदतः। साध्यम। विज्ञेया नारा हि सिक्ता। सर्वोक्ते। धार
येत् कंगदेशे तु स्त्रीय माकर्षयेत् क्षणात्। आकर्षयत्यंबुनिधेः समिरोस्वर्पादिगंततः। पातालादिंद्र
लोकादिन् हेमस्त्री शैल भरुहान्। गोपनी॥ ॥इत्याकर्षणयंत्रं॥ ॥अथ वक्ष्ये सुरेशानि यंत्रं
सर्वार्थसाधनं। पशुरक्षाकरं स्वेत स्वर्वारिष्टनिवारणं। वियन्नभो शिवपदे नभः स्वं च नभयवि
नो॥ गो घुः सुरा वियत्स्वरं च विलिखेत् क्रमशः सुधीः। इत्यादि मुनितं तेषु गुप्तसारा शि वापदेः। सा शिवः। ॥२२॥
ध्यसा। विलिखेत्। साध्यमत्र सुराधीशे विशालाक्षा भुवनेश्वरी। सर्वोक्तेः। धारयेद्दक्षिणे पार्श्वे पशो
रक्षा परा मता। अश्वानां हस्तिनां चैव गवां महिषीणामपि। उष्ट्राणां दष्ट्रिणां चैव रक्षायाः कारकं परं।

इदं यंत्रं मया तुभ्यं पशुरक्षाकरं परं। गोपयेन्नो॥ ॥इति पशुरक्षाकरं यंत्रं॥ ॥अथ वक्ष्ये महिमं
महत्त्वपरिदायकं। मान्यं सर्वत्र लोकेषु जायते मानवस्य च। नभो वियत् शिवपदे स्वं नभश्च विय
न्नभः। गो घुः सुरानन प्रोक्तं वियत्स्वरं चक्रमालिखेत्। सर्वं सर्वं विभागेन कोष्ठकस्य विभाग
तः। इत्यादि मुनितं तेषु गुप्तसार शिवापदेः। साध्यसा। विलिखेत् सर्वकोष्ठेत्र सर्वकोष्ठविशेषतः।
साध्यम। ब्रह्माणी परमेश्वरी। सर्वोक्तेः। धारयेद्यंत्रराजं तु बाहौ वामे स्वकेपि वा। धारणात् सर्व
महत्त्वं च प्राप्नोत्यत्र संशयः। इदं यंत्रं सुराध्यक्षे महत्त्वपरिदायकं। तुभ्यं मया समुद्दिष्टं कृत्वा गो
प्यं त्वयानघे॥ ॥इदं महिमयंत्रं॥ ॥जलस्तंभकरं यंत्रं मन्यले वाच्मि सांप्रतं। येन विज्ञानमा
त्रेण जलस्तंभो न वेद्धणात्। नभो वियत्शिवपदे स्वं नभश्च वियन्नभः। गो घुः सुरानन प्रोक्तं
वियत्स्वं चक्रमालिखेत्। इत्यादि मुनितं तेषु गुप्तसार शिवापदेः। साध्यसा। विलिखेत् सर्वं सर्वा
मध्यकोष्ठविनेदतः। साध्यम। विज्ञेया वैष्णवी परा। सर्वो। धारयेज्जलमध्ये तु मवाहस्य तु सन्मु

खे।जलस्तंभयतेक्षिप्रंनात्रकार्याविचारणा।इदंयंत्रंजलस्तंभकारकंपरिकीर्त्तितंगोप्यं॥ ॥इति
२३ जलस्तंभकरंयंत्रं॥ ॥क्षेत्ररक्षाकरंयंत्रंसंप्रवक्ष्येधुनाप्रिये।येनविज्ञानमात्रेणधान्यानांरक्ष
णंपरं।वियन्नभोशिवपदेखंनभश्चनभोनभः।गोक्षुःसुरानंदंप्रोक्तंवियत्खंसुरेश्वरि।इदंषाई॰।
सर्वसर्वविभेदेनसाध्यसाधकयोस्तथा।वर्णानेकाः।सर्वसर्वः।साध्यमनडुपांगतल्लितामता।
सर्वोक्तेः।धारयेद्दक्षिणेपार्श्वेहस्तस्यपरमेश्वरि।नतस्यजायतेक्वापिनयंक्षेत्रस्यमुरुर्वं।इतेर्भयंना
शमेतिपरसैन्यभयंनहि।जायतेपरमेशानिसस्यानांपरमार्धिर्तिः।इदंयंत्रंवरारोहेक्षेत्ररक्षाक
रंपरं।कर्षकाणांहितार्थायितवाग्रेप्रगटीकृतं॥ ॥इतिक्षेत्ररक्षाकरंयंत्रं॥ ॥चौरनाशकरं शिवः।
यंत्रंशृणुमत्प्राणवल्लभे।द्वितीयेप्रथमकोष्ठेषुकुर्द्दैवत्रयोदशे।षोडशेदशमेवाणेतृतीयपंच ॥२३॥
मालिखेत्।गजगतापरानंकानेकीकृतपदत्लोकृलान्।धारयेत्सर्वेष्वर्वाचकोष्ठेभेदात्सुरेश्वरि।
साध्यसा॰।साध्यमंत्रं।कालिकापरमेश्वरि।सर्वोक्तेः।धारयेत्कंठगंसम्यकुनिर्भयोजायते

क्षणात्।चौराविनाशमायांतिमार्गस्थवनवासिनः।यंत्रस्यधारणादेविजायतेसुखभागिनः।
इदंयंत्रंचौरनाशकारकंपरिकीर्त्तितंगोपनीयं॥ ॥इतिचौरनाशकरंयंत्रं॥ ॥अथयन्त्रंमहे
शानिकूटदुर्गहरंपरं।यंत्रंतेसंप्रवक्ष्यामिकृत्वागोप्यंत्वयानघे।नागेपक्षेविघमितेरुद्रपंक्तौ
चषोडशे।तृतीयेपंचमेमंत्री।विलिखेत्क्रमशःसुधीः।साध्यम॰विज्ञेयामनुसिद्धिदा।सर्वोक्तेः।धा
रयेद्दक्षिणेपार्श्वेघोटकस्यसुरेश्वरि।समारूढस्तदृयंपश्चात्कूटदुर्गविशोधुधः।जायतेविजयो
देवीनात्रकार्याविचारणा।इदंयंत्रंकूटदुर्गहरणंपरिकीर्त्तितं॥ ॥इतिकूटदुर्गहरंयंत्रं॥ ॥
महादुर्गहरंचान्यत्तवाग्रेप्रगटीकृतं।शृणुष्वपरमेशानिसद्यःप्रत्ययकारकं।विघरुद्रवसु
मितेनेत्रेवकोचपंचमे।दशमेषोडशेपश्चान्नागगतस्ततोन्वेत्।साध्यसा॰।सर्वसर्वविभे
देनश्रयेक्वविलोमतः।साध्यम॰।देवीवाग्वादिनीपरा।सर्वोक्तेः।धारयेदंगसंलग्नंस्वस्यैवा
यहपस्यच।धारणाद्विजयेन्नूनंमहादुर्गेनसंशयः।इदंयंत्रंमयाप्रोक्तंमहादुर्गहरंपरं॥ ॥

२४ इतिमहादुर्गहरंयंत्रं॥ ॥वीर्यस्तंभकरंचान्यच्छृणुमत्तोवरानने।यत्नात्प्रियंतुविज्ञायमयातुभ्यं
प्रवक्ष्यते।रुद्रेविशिखबाणमितेवह्नित्र्यरसमनो।द्वारस्येश्वरयेद्देविनागगत्याततःपरं।साध्यसा॰
त्र्यर्द्धिक्लृप्ततःप्रिये।सर्वंसर्वविलोमेनस्मरयेत्साधकोत्तमः।सर्वांकैः।साध्यमत्रवरारोहेश्रोत्रस्पदे
वीश्रुणुमानानां।धारयेदंगसंलग्नंकंठेवाथस्थलेयवा।वारणाद्रेतसोरोधोजायतेस्वेच्छयापुनः।शत
नारीपराभोगानरेतस्खलनंप्रिये।सप्रायामाममिदंयंत्रं।मयातेपरिदर्शितं।गोपनीयं॥ ॥इतिवी
र्यस्तंभकरंयंत्रं॥ ॥व्याघ्रविद्रावणंचान्यच्छंजंराजंश्रृणुप्रिये।अरण्येपनिर्जलेदेशेव्याघ्रैर्वरस
मन्विते।उपयोगीमहायंत्रंपांथानांदुर्गचारिणां।महापर्वतसंस्थानांहितदंभयनाशनं।शो शिवः।
डशोदशमेबाणेवह्नौनेत्रेष्टमेपुनः।शिवेविश्वेततःपश्चान्नागगत्याप्रपूरणं।साध्यसा॰।नद्यीक ॥२४॥
त्यततःपरं।सर्वंसर्वविलोमेनस्मरयेद्देशिकोत्तमः।साध्यमत्रप्रियेवाणीवीणापुस्तकधारिणी।
सर्वांकविधिनालेख्यंयंत्रराजंविलेपनैः।धारयेन्मूर्द्धिहस्तेवाप्रकोष्ठेषुगुल्फोपुच्छ।धारणान्निर्भ

योभूत्वाविचरेत्तुयथासुखं।नव्याघ्रवृकभल्लूकगजसर्पजलूकजं।भयंनजायतेक्वापिसत्य
मेतद्वरानने।इदंयंत्रंव्याघ्रभयविद्रावणाकरंस्मृतं।सर्वथागोपितव्यंतेममवाक्यान्महेश्वरि
॥इतिव्याघ्रविद्रावणंयंत्रं॥ ॥सर्वविघ्नहरंयंत्रंगणाधिपतयेस्मृतं।तत्तेहंसंप्रवक्ष्यामिश्रु
त्वाविघ्नैर्नभयतो।नागेपक्षेविश्वसंख्येरुद्रेपंक्तौविकारके।वह्नौबाणेलिखेद्धत्वानागगत्या।
ततःपरं।साध्यसा॰।अ॰।विलिखेत्पूर्वंसर्वाद्यविलोमगतिना।प्रिये।साध्य॰।रमाकमलवा
सिनी।सर्वांकैः।लिखित्वाधारयेद्देहेदेहेबाहौतथोदरे।धारणान्मानवोदेवीनविघ्नैर्नयन्ना
ग्भवेत्।सुसंतुष्टेनचमयाहेरंबायसंदर्शितं।तवाग्रहात्पुनःप्रोक्तंयंत्रराजंत्वयानघे॥ ॥
इतिसर्वविघ्नहरंयंत्रं॥ ॥कृतविद्रावणंयंत्रंतथाभेतनिवारणं।सांप्रतंकथयिष्येहंसिद्धिदं
पारदंपरं॥ममा॰तिप्रेमदंयंत्रंपारदंभवपारदं।मनोरथोत्श्वरेचंद्रेवेदेनकैमितं।कैकेतिथो
लिखेत्क्रमादंकान्नागगत्याततःपरं।साध्यसा॰।व॰।अ॰।विलिखेत्पूर्वंसर्वांश्चविलोमगतिना।

२५ ।प्रिये ।साध्यमत्रसमुद्दिष्टारौद्राहरणनवाहिनी ।अथ विषे ।धारयेच्चेत्रमध्यात्त्वशर्वनागेवि
वेक्षणः ।पश्चात्क्रियोपारदस्य प्रकुर्यात्साधकोत्तमः ।इदं यंत्रं सिद्धिरूपं तुभ्यं सम्यक्प्रदर्शि
तं ।अनंतेन भेषजं ।सिद्धिंगुटिकाकर्णेकल्पजं ।महापारदसिद्धिं च ददातिसुरसुंदरि ।गोप
नीयं विशेषेणशेषलोकस्यदुर्लभं ॥ ॥इति मृत्युप्रद्रावणपारदसिद्धिप्रदयंत्रं ॥ ॥अथा
तुलपरंयंत्रं योगसिद्धिप्रदायकं ।लवाम्येकप्रिये याम्भियोगिनोहितकाम्यया ।रनौमनौवि
धौपश्चात्स्वरेविश्वेशिवेजैंगे ॥पदेवह्नौबाणामितेपंक्तौशेषोडशकेलतः ।लर्केरूपेतिथौ
वांकेविलिख्यपरमेश्वरि ।साध्यसार्गं ।इत्ययेद्विधिनानेनसर्वत्रसर्वविलोमतः ।साध्यमं ।। शिवः ।
वासाहौविश्वधारिणी ।धारयेद्हृदयेदेवीपश्चाद्योगंसमभ्यसेत् ।योगसिद्धिमवाप्नोति ॥२५॥
सत्यंसत्यंवरानने ।इदंयंत्रंगोपनीयंयोगसिद्धिमुत्तमं ।योगिनेसाधवेदेयंछायापप्र
वाप्रिये ॥ ॥इतियोगसिद्धिप्रदंयंत्रं ॥ ॥सर्पाकारकरंयंत्रंमनुष्याणांहितावहं ।धारणंस्त्री

ननिर्मोकोवारणं ।विषमारणं ।दंदशूकामितिर्दंदशूकमहाशी ।विषधारणं ।सहरणंपरमंयंत्रमस्या
कौतुककारकं ।रसेवेदेतिथौनंदेवह्नौबाणेचषष्ठिमिते ।विकारेविश्वसंख्येतु शिवेवसुमि
तेहये ।नानौमनौतथाचंद्रेस्वरेचविधिनाप्रिये ।साध्यसार्गं ।साध्यमत्रं ।विशेषावटयक्षि
णी ॥ ॥इतिसर्पहरंयंत्रं ॥ ॥अथघनवकोणात्मकंयंत्रंसमिष्टफलदायकं ।नवग्रहहरंचे
तद्भूतप्रेतज्वरेगगामिनी ।स्त्रीणामसुहरंचैतत्तथाशोणितरोगं ह ।रागयक्ष्महरंचैवमहाती
सारनाशनं ।गलगंडहरंचैवश्वासनाशनमेवतथा ।शांतिहंदुदरोगघ्नंमेहघ्नंसमुदाहृतं ।
समिष्टनवरोगाणांनाशनंसप्तगारितं ।स्वरेचंद्रेमनौनानौपक्षेनागेशिवेतथा ।विश्वे
चषोडशेपंक्तौबाणेवह्नौनंदके ।तिथौरूपेरसेचैवदशर्येदेविसाधकः ।साध्यसार्गं ।
विलिखेत्सर्वसर्वाद्यविलोमविधिनाप्रिये ।साध्यमं ।विशेषाजननीपरा ।सर्वोत्कें ।धारयेद्
क्षिणेंगेवास्त्रीणांवामेतुपार्श्वतः ।यत्रयत्रभवेत्पीडातत्रतत्रापिधारयेत् ।धारणान्नाशमा

२६ योति नवरोगाः सुरेश्वरि। इदं यंत्रं नवकोष्ठफलदं परिकीर्तितं। सर्वसंगोपनीयं नास्ये दे
हि दुरात्मने॥ ॥इति नवकोष्ठात्मकं यंत्रं॥ ॥अथ दृष्टिहराख्यमाह लानिमित्तो निशामय व
र्णमात्राविभेदेन युगरूपप्रदो भवेत्। अनावर्षण कालेऽद्य कर्त्तव्यं यंत्रमुत्तमं। तदा दृष्टिक
रं ह्येयं विपरीतार्णसंभवं। अनावृष्टिहरे हेतवस्तथा दृष्टिनिवारणं। वर्णाद्यमात्राभेदेन ह्येयं
द्विधा विचक्षणैः। पक्षे नागे शिवे विश्वे षोडशे पंक्तिसंमिते। बाणे नकोष्ठे लिखेद्द्वि नागगत्या
ततः परं। साध्य सा० व० अ० विलिखेत्सु वेश्वर्वाद्य विलोमविधिना प्रिये। साध्यमत्र च सारोहे
महाभीमोग्र दंष्ट्रिणी। भीमादेवी समाख्याता प्रयत्नेन विधिना लिखेत्। धारयेद्ध्वजरेखांते
ध्वजायां वास्वके गृहे। धारयेज्जायते वृष्टिः समने प्रतिमोचने। इदं यंत्रं मया प्रोक्तं निग्र ।शिवा॥ ॥२६॥
हानुग्रहात्मकं॥ ॥इति दृष्टिकरातिदृष्टिहरं यंत्रं॥ ॥दुर्भिक्षहरणं यंत्रं वक्ष्येहं सांप्रतं प्रि
ये। यस्य विज्ञानमात्रेण दुर्भिक्षं तत्क्षणात्व्रजेत्। चंद्रे स्वरे तथा भानौ मनौ पंचदशे तथा।

नवमे तर्कसंख्ये तु तुर्ये चैव यथाक्रमं। विलिखेत्साधकः श्रेष्ठो गोनोगत्या ततः परं। साध्य
साधकयोर्वर्णान् नक्षत्रस्य विलोमतः। विधिस्थ धारयेत्प्राज्ञस्तु छायां दंडमंडले। दुर्भि
क्षं तत्क्षणात्कृत्वा महादुर्भिक्षनाशनं। सम्यक्कथितं तु भ्यं गोपनीयं विशेषतः॥ ॥इति
दुर्भिक्षहरं यंत्रं॥ ॥कोष्ठत्रयात्मकं यंत्रं शृणु मत्प्राणवल्लभे। नानो सवप्रदं चैकं द्वितीयं
नगरप्रदं। तृतीयं राज्यपदं प्रोक्तं गुणत्रयमयात्मकं। यंत्रराजं समासेन वक्ष्ये शृणु नामि
रवि नि। नागे पक्षे विश्वसंख्ये रुद्रे पंक्तौ षोडशे। तृतीये पंचमे कोष्ठे विलिखेत्प्रोक्तमार्गतः
शेषांका नागगत्यात्र विलिखेत्षष्ठकोष्ठके। साध्य सा० दक्षीरुलाघकोष्ठे सा तु सर्वेश्वरि वि
लोमतः। साध्ययत्रमहादेवी लोकवल्लापरमेश्वरि। हृद्वीक्षैः॥ धारयेद्यस्तु संलग्नं कामना वांछि
तार्थदं। वर्णमात्राविभेदेन कार्यभेदं समाचरेत्। इदं यंत्रं त्रिफलदं मया ते परिकीर्तितं। धा
रणाज्जायते राज्यं महानगरता भवेत्॥ ॥इति महाराज्यप्रदं नगरप्रदं यंत्रं॥ ॥शत्रुराज्यं

रत्याश्च शत्रुलक्ष्मीहरं परं। फलद्वयमिदं यंत्रं संक्षेपाच्छृणु पार्वती। विंशे रुद्रे वसौ नेत्रे वह्नौ
बाणे च दिक्स्थिते। षोडशे विलिखेल्लक्ष्यावन्नागगत्यात्ततः परं। साध्यसा० च अ०। विलिखेत्सर्वको
ष्ठेषु विलोमविधिना प्रिये। दूर्वां क्लैं०। लिखित्वा धारयेत्प्राज्ञः शत्रुराज्यं परं जयेत्। लभते श
त्रुलक्ष्मीं च नात्र कार्या विचारणा॥ इदं यंत्रं समाख्यातं महाप्रत्ययकारकं। साध्यम०। विक
टा परमेश्वरि गोपय॥ ॥इति शत्रुराज्यहरं शत्रुलक्ष्मीहरं यंत्रं॥ ॥अथ काव्यकरं वक्ष्ये तथा
मेधाविवर्द्धनं। फलद्वयात्मकं यंत्रं मत्तः शृणु वरानने। षोडशे दशमे बाणे वह्नौ पक्षे वसौ शि
वे। विश्वे स्वरे द्वयमेव मनौ भानौ नयां विक्षिके। तिथौ सूर्यैरसमितेष्वरयेच्च समासतः। विलि
खेत्साध्यकं श्रेष्ठो नागगत्या ततः परं। साध्यसा०। विलिखेत्सर्वकोष्ठेषु सर्वपूर्वविभेदतः।
साध्यम०। रक्तदंतिका। दूर्वां क्लैं॥ धारयेत्कंठगं सम्यक्सद्यस्तत्फलभाग्भवेत्। काव्यं तु क्रिय
ते देवी घटिकाशतकं प्रिये। महाकविर्भवेन्मासान्महाबुद्धिमतां वरः। इदं यंत्रं फलद्वंद्वजननं

समुदाहृतं। गोपनी०। इति काव्यकरं मेधाजननं यंत्रं॥ ॥अथ वक्ष्ये चतुःकोष्ठं यंत्रं महिमवर्ध
नं। महामृत्युहरं चैव मध्यमृत्युहरं परं। अपमृत्युहरं चान्यत्तथा दुःस्वप्ननाशनं। चतुष्कफलदं
वक्ष्ये मम चाति प्रियंकरं। विकारे दशमे बाणे वह्नौ नेत्रे क्षमे पुनः। रुद्रे विघ्ने लिखेद्देवि नागग
त्या ततः परं। साध्यसा०। विलिखेत्सर्वसर्वेण विलोमगमनेन च। साध्यम०। सर्वसंमोहिनी परा
। दूर्वां क्लैं०। धारयेत्कंठदेशे तु महामृत्युं विनाशयेत्। इदं यंत्रं चतुष्कं तु मया देवी निवेदितं। गो
प०॥ ॥इति चतुष्कोष्ठात्मकं मृत्युहरं यंत्रं॥ ॥अथातः शृणु देवेशि महायुं जयदं त्विदं। येन
विज्ञानमात्रेण शत्रुमध्ये जयेत्क्षणात्। पंचमे भुवने रुद्रे लक्षे वह्नौ रवौ तथा। विश्वे रसे विकारे
मनौ चैव द्वितीयके। नवमे दशमे वा घे नागे पूर्वं चं दशे पुनः। स्थापयेत्परमेशानि दूर्वं०। साध्यसा०
अर्द्ध०। दूर्वां क्लं विधिना लेख्यं वर्णरूपविभेदतः। साध्यम०। देवी श्री। शिवदूतिका। दूर्वां०। शि
खायाम यथा कंठे करे वा वामदक्षिणे। धारणाज्जायते शौर्यं शत्रुमध्ये विमर्दनं। बलं भवति त

२८ स्यारनवनागसहस्रकं। इदंयंत्रंसदागोप्यंदेयंपुत्रायसाधवे॥ ॥इतिमल्लयुद्धयंत्रं॥ ॥
प्रतिमाचालनंयंत्रंशृणुचान्यद्वरानने। तथैवचाग्निसंस्तंभःकारकंपरिकीर्तितं। रवौवक्रे
रसेविन्यस्य मनौबाणेचतुर्थके। रुद्रेखाये पंक्तिसंस्थेलिखेन्नागेस्वरेलथा। षोडशेनवमेप
क्षेसम्मितेक्रमशो। लिखेत्। साध्यसा०निलिखेत्पूर्वस्वरोनुविधिनापरमेश्वरि। पूर्वोक्तेः। धार
येत्प्रतिमायास्तुमूर्ध्नि साचलतेक्षणात्। एवमेवपरंयंत्रंविलोमजलमध्यतः। प्रोक्षयेद्वह्नि
संदग्धंविदग्धंभवतिक्षणात्। मत्सत्तमग्निंशमयेदावानलमथापिवा। इदंयंत्रंमयाप्रोक्तंप्र
तिमाचालनंपरं। मत्स्याग्निस्तंभनंभद्रेसम्यगेवप्रकाशितं॥ ॥इतिप्रतिमाचालनमग्निस्तंभनक शिवः।
रंयंत्रं॥ ॥अथसम्यक्शृणुप्राज्ञे यंत्रंतुकुलवर्द्धनं। येषांकुलेसंततिर्न तेषांचातिहितं ॥२८॥
मतं। वंध्यानांपुरुषाणांच नारीणांचविशेषतः। हितकारिमयाप्रोक्तं यंत्रंतेत्रार्थकोविदं। त
र्पणष्ट्वघगत्याचमंत्रीगत्यानवात्मके। वाजिगत्यातिथौलेख्यं रथगत्यामनौलिखेत्। सूर्ये

तुवाजिगत्यातुसप्तमेमंत्रिमार्गतः। अथवमेवाजिगत्यातुविलिखेत्साधकःक्रमात्। तदंकान्कुजग
त्यातुनागकोष्ठेषुसंलिखेत्। साध्यसा०। विलोमगतिनाप्रिये। साध्यम०। पंचपंचात्मिकापरा। पूर्वोक्तेः।
धारयेत्कंठभागेतुस्त्रियाःकंठेप्यबंधयेत्। धारणाद्यंत्रराजस्यपुत्रंकुलविवर्द्धनं। अपुत्रकु
लंगेहेजायतेपौत्रसंभवो। इदंयंत्रंकुलकरंमयातेसमुदीरितं। गोपनीयं॥ ॥इतिकुलवृद्धिकर
यंत्रं॥ ॥रथस्तंभनकरंचैवगतिस्तंभनकरंपरं॥ शृणुप्राज्ञेप्रवक्ष्यामिनानाद्भुतविनायकं। षोड
शेदशमेदेवीबाणेवह्नौद्विनीयके। नागेरुद्रेविन्यस्यचैवप्रत्ययेक्रमशःसुधीः। तदंकान्नागगत्या
तुनागकोष्ठातिरूपेत्। साध्यसा०। विलोमगतिनाप्रिये। साध्यम०। शांतभीपरा। पूर्वोक्ते०। र
थस्तंभंप्रयात्याशुवाजिवेगपुरस्कृतं। शीघ्रगामीतथापेंतुकुरुतेनविचारणा॥ इदंयंत्रंर
थस्तंभंगतिस्तंभकरंपरं। गोपनीयंत्वयाभद्रेनिंदकायनदापयेत्॥ ॥इतिरथगतिस्तंभ
करंयंत्रं॥ ॥अथपक्षेसुरेशानिद्यूतेविजयदायकं। विवादेविजयंचैवशृणुदेवीयथार्थतः। पं

चमेवह्निकोष्ठेषु षोडशो पंक्तिसंमिते। तुर्ये रसेनंदमिते तिथौ रुद्रे त्रयोदशौ। पक्षे नागे मनौ
सूर्ये स्वरेच्च न्यघमेक्रमात्। साध्यसा॰। विलिखे॰। विलोमगत्तिनापिशा। साध्यम॰। पंचदशि
का। एवीं लें॰। धारयेज्जानुमध्ये च घृते विजयमाप्नुवेत्। विवाहे कंठसंलग्ने यंत्रं कुर्यात्स
दा नघे। विवादे विजयोज्ञाप शत्रुनाशकरं परं। इदं यंत्रं समुद्दिष्टं शुभायार्थफलप्रदं। तप्र
गोप्यं त्वया देवी महाकौतुकदायकं॥ ॥इति घृतविवादजयप्रदं॥ ॥अथ वक्ष्ये शुभे दे
वि महानन्दप्रदं परं। इंद्रजालकरं चान्यत् फलद्वय समाहृतं। नरविद्याहि लिंचेव महाक्र
पटकारकं। पंक्तौ विकारेव कोष्ठे च बाणेनागेषु पक्षके। विघ्येशिवे लिखेद्देवी नागगत्या लता। पर दीवः।
साध्यसा॰। विलिखेत्सर्वं॰। विलोम॰। साध्यम॰। व॰ त्रेधरीपरा। एवीं॰। धार्ये च रणेदक्षेन त्यारं जे ॥२५॥
सुरेश्वरि। इंद्रजालक विद्यानां कौतौ न संदर्शयेत्विदा। लोकानां दृष्टिबंधं च कुरुते नात्र संशयः॥
इदं यंत्रं नलकरं। तथेंद्रजालसिद्धिदां कथितं रक्षणीयं ते स्वयोनिरिव पार्वती॥ ॥इतिन्द्रजालक

मिंद्रजालसिद्धिदं यंत्रं॥ ॥महासारस्वतं यंत्रं तथा मंत्रस्य सिद्धिदं। उनयं घेकतो वक्ष्ये साव
धानतया शृणु। मर्षौ लांत्रु हिताथौयत त्यावित्या। निष्टसिद्धये। नाना मंत्रार्थसिद्धीनां फलदं
विधिनाखिलं। शिवे विश्वे बाणसंख्ये च वक्त्रे तुर्ये रसे मनौ। रवौ तु पूरयेद्देवि सर्वे नागस्य मा
र्गतः। साध्यसा॰। विलोम॰। साध्यम॰। देवि त्रिपुनमालिनी। एवीं॰। कंठे सारस्वत प्राप्त्ये मंत्रसि
ध्येतु मर्द्धनि। धारणात्सर्वविद्यानां वेत्ता भवति निश्चितं। मंत्रसिद्धिमवाप्नोति शीघ्रमेव न सं
शयः। इदं यंत्रं समुद्दिष्टं महासारस्वतप्रदं। मंत्रसिद्धिकरं श्वेतकोपनीयं प्रयत्नतः॥ ॥इति
महासारस्वतप्रदं मंत्रसिद्धिप्रदं यंत्रं॥ ॥चतुरस्रात्मकं यंत्रं शृणु चान्यत् परेश्वरि। सर्वमंत्रे
पहरणं घोरशत्रुहरं परं। षडीति हरणं चान्यत्स्याट चौरहरं परं। त्र वह्नामि विभेदेन सर्ववर्णा
र्लभेदतः। रवौ मनौ तथा चंद्रे स्वरे च विश्वगे जे शिवे। पक्षे पक्षौ बाणमिते दशमे षोडशे रसे। तये
तिथौ चांकमिते विलिखेत्परमेश्वरि। साध्यमा॰। वि॰। कोष्ठसंख्या विभेदतः। साध्यम॰। मालि

३०

नी परमेश्वरी। सर्वो०। बाहौ वा दक्षिणे कंठे धारयेद्यंत्रनायकं। धारणात्कोपहरणं घोरशत्रु
विनाशनं। भ्रांतिहरणं ह्येतन्मध्यपस्तंभविधौ रितं। पाटच्चरहरणं मार्गे रक्षार्थं यंत्रं पुरा ह्यजेतं
पाटच्चरभयं हित्वा सुखी चरति मार्गतः। इदं यंत्रं चतुःकोष्ठं संज्ञकं परिकीर्त्तितं। गोपनीयं०।
॥ इति चतुःकोष्ठात्मकं यंत्रं॥ ॥ मस्तकोच्छापनं यंत्रं विकलीकरणं परं। यंत्रं समाक्षिप्योगेन
कार्यद्वयसमाहृतं। नागे पक्षे तथा विश्वे रुद्रपंक्तौ तु षोडशा वह्निकोष्ठगणे कोष्ठे नागगत्या
पराह्निखेत्। साध्यसा०। विलोमनल्लिखेत्। साध्यम०। त्रिपुरभैरवी। सर्वोक्तैः। धारयेद्भूतं
वा मस्तकस्पर्शानने। इदमेव रिपोर्गेहे स्वनयेद्भूरुलीटैलैः॥ विकलीकरणं कुर्याद्यदा सोल्लं शिवः।
घयेद्वितत्। वर्णमात्रातपानेदान् ज्ञात्वा वै यंत्रनायकं। महाश्चर्यमयं देवि गोपनीयं तु सर्व ॥३०॥
तः॥ ॥ इति मस्तकोच्छापनं विकलीकरणं यंत्रं॥ ॥ इदानीं शृणु देवेशि षट्कोष्ठं तु महाद्भुतं।
यंत्रराजं वरारोहे सर्वप्रत्ययकारकं। धर्मप्रदं चार्थदं तु कामदं मोक्षदं त्विदं। ज्ञानदं लयदं

तत्र षट्कोष्ठ सकलार्थदं। विश्वे रुद्र वसौ नेत्रे वह्नौ बाणे च दिग्मिते। षोडशे चापरान्कोष्ठे
नागगत्या समालिखेत्। साध्यसा०। विलोम०। साध्यम०। भीमचंडी परात्परा। सर्वोक्तैः०। धा
रयेद्दक्षिणे करे। हृदये वा घटे देवि श्रीसद्यःफलमवाप्नुयात्। इदं यंत्रं तु षट्कोष्ठं कथितं तव
गौरवात्। गोपनीय०। ॥ इति षट्कोष्ठाख्यं यंत्रं॥ ॥ खेचरी सिद्धिदं यंत्रं कथयामि फलप्रदं
इदं यंत्रं तु कमलाचार्थदं परिकीर्त्तितं। फलद्वयकरं सर्वकार्यगौरवलाघवात्। नवमे चाग्नि
यो वेदे रसे षोडशमे पुनः। दशमे पंचमे वह्नौ पक्षे नागाशिवे पुनः। विश्वेश्वरे चंद्रमिते मनोन्म
नीसमालिखेत्। साध्यसा०। विलोम०। साध्यम०। सिद्धिस्तु परमेश्वरी। सर्वोक्तैः। धारयेच्च स्वके
देहे खेचरी सिद्धिनामवत्। सकलार्थप्रदं ह्येतद्रहस्यं यंत्रमुत्तमं। इदं यंत्रं समाख्यातं तंत्रग्र
कार्यार्थसाधकं॥ गोपनी०॥ ॥ इति खेचरीसिद्धिप्रदं सकलार्थदं यंत्रं॥ ॥ चतुःकोष्ठपरं वक्ष्ये
समिद्धफलदायकं। तवाग्रे कथयिष्यामि महत्कौतुककारणं। कामधेन्वाभिधं चैतत्कल्पवृक्ष

३१ सान्निधं त्विदं। चिंतामणिसमाख्यं च रोहिण्याख्यं स्मृतं परं। चक्रकोष्ठ(?)तु विज्ञेयं मनोऽभिलषितप्र
दं। सप्तमे प्रथमे देवि भुवने भानुसंमिते। नवमे च तिथौ वेदे रसे वेणोऽङ्कशे पुनः। दशमे पंचमे वह्नौ
पक्षे नागे शिवे तथा। त्रयोदशो लिखेन्मंत्री गुर्वनुज्ञापुरःसरं। साध्यस्था०विलोम०साध्यम०मूल
नक्षत्रिसंभवा। एवोक्तैः। धारयेद्दक्षिणे पाणौ वाञ्छितार्थफलप्रदं। इदं चक्रकोष्ठमयं मया तुभ्यं प्रका
शितं। गोप्तव्यं सर्वदा भद्रे नास्तिकेभ्यः सदेव हि॥ ॥इति चक्रकोष्ठसान्निधंयंत्रं॥ ॥अमरौघजयं नाम
यंत्रराजं शृणु प्रिये। यंत्रस्यास्य प्रभावेन देवाः सर्वे वशं गताः। पक्षे नागे शिवे विश्वे मुनौ चंद्रे मुनौ रवौ।
नंदे तिथौ युगे तर्के षोडशे दशमे शरे। वह्नौ लिखेत्क्रमेणैव सर्वं पूर्वविधिर्द्दतः। साध्यस्था०विलोम०सा शिवः।
ध्यम०कंटकी वश्यकारिणी। एवोक्तैः। अमरौघवशं यांति सघण्ए(?) वनसंशयः। इदं यंत्रं समुद्दिष्टं ॥ ३१ ॥
वौघवशंकारकं। गोप्य०॥ ॥इत्यमरौघवशंकरं यंत्रं। अधुना शृणु देवेशि यंत्रराजं महाद्भुतं। फ
लाकारं भवेद्येतन्महापापा(?)ललान्निधं शुभं। महारौरवसंज्ञं तु कालघ्नं नरकापहं। विश्वे पक्षे रवेचंद्रसं

द्रे मनौ भानौ नवांख्ये के। तिथौ वेदे रसे पक्षात्षोडशे वि। खेंदुविक्रमात्। साध्यस्था०विलोम०साध्य
म०कमलारत्नवाहिनी। एवोक्तैः। धारयेत्कंठगे सम्यक् कालघ्नं नरकं हरेत्। विहरेत्स्वर्गे वर्षा पुनर्विभ्रैरनि
न्वयते। महापातककर्तापि नरकं नैव पश्यति। इदं यंत्रं मया किंचित्संकोचात्प्रकटीकृतं। गोप्य०॥ ॥महा
कालमहारौरवहरं यंत्रं॥ ॥अथातः शृणु देवेशि ब्रह्मास्त्रं यंत्रनायकं। यस्य विज्ञानमात्रेण यंत्रसि
द्धिर्विजायते। नंदे पंच दशे वेदे रसे चैव तु षोडशे। दशमे पंचमे वह्नौ पक्षे नागे शिवे पुनः। स्थिर विश्वे च
रम्य मितेमनौ भानौ यथाक्रमं। साध्यसा०विलो०साध्यम०। त्रतु सावित्री देवी च सप्तवातिच। सर्वे
कैला(?)कृद्धि धारयेत्तास्य सर्वे फलंति देवेशि सर्वोत्कं यंत्रमेलनं। इदं यंत्रं वरारोहे तवाये प्रकटीकृतं। गोप्य०
॥इति ब्रह्मास्त्रयंत्रं॥ ॥अथान्यतमहेशानि यंत्रराजं मनोहरं। नारसिंहं तु यावंत्रं नारायणमथाप
रं। भवत्येवम्महादेवि यंत्रे कं फलं द्विभाक्। नारसिंहं नयहरं रक्षकं चापरं प्रिये। नयने नागकोष्ठे तु
शिवे विश्वे स्वरे मिते। चंद्रे मनौ रवौ मंदे तिथौ वेदे रसे पुनः। विक्रार(?)दशमे बाणे व कीर्णोष्ठे लिखेत्सु

३२ धीः साध्यसा ० विलोम ० साध्यमत्रमहामायादेवी त्रिभुवनेश्वरी। एवौं ० कं गे। धारणान्निर्भयो देवि जायते मानवः प्रिये। रक्षितो देवतावृंदैर्जीयते परमेश्वरि। इमं तेयंत्रराजं तु मया सम्यगुदीरितं। गोपनीयं
रत्तिनारसिंहनारायणनामयंत्रं॥ ॥अथ वक्ष्ये रौद्रसंज्ञं चान्यघोरमपूर्वकं। विधिवत्कथयिष्ये
फलद्वयसमन्वितं। षोडशे दशमे बाणे वह्नौ नेत्रे वसौ शिवे। विश्वेश्वरे चंद्रसंज्ञे मनो मानो तथा विकेः
तिथौ वेदे रसे पश्चात् षोडशे विलिखेत्क्रमात्। साध्यसा ० विलोम ० साध्यम ० देवी श्री धुम्रलोचना।
सर्वांनि कंगे च वामबाहौ वा हृदये मूर्द्धि धारयेत्। इमं यंत्रं गोपनीयं॥ ॥इति रौद्रघोरयंत्रं॥ ॥अधुना
शृणु देवेशि यंत्रराजाभिधं परं। न कस्यचिन्मया प्रोक्तं दृष्टं वा पिनकेन चित्। तदहं संश्रुणु प्रीत्या मम
नाम्निन ता न नो अस्मात्परतरं नास्ति मम प्रेम्णा विवर्द्धनं। नंदे तिथौ तथा वेदे रसे वा षोडशे पुनः। ।शि.न.। ।।३२।।
दशमे पंचमे वह्नौ नेत्रे चैव वसौ शिवे। विश्वेश्वरे भूमिर्मिलेत् मनोः सर्वे लिखेद्बुधः। साध्यसा ० विलो
म ० साध्यम ० भवानी भवतारिणी। सर्वांके ० धारयेन्मस्तके नरः ममतुल्यो हिजायते। कर्ता हर्ता स्वयं

३३ देवि जायते मानवोत्तमः। इमं यंत्रं यंत्रराजाभिधं ब्रह्मं मयोदितं। गोपनीयं। ॥इति यंत्रराजाभिधं यंत्रं।
इति श्री दक्षिणामूर्ति पार्वती संवादे सर्वतंत्रोत्तमोत्तमे नगेंद्र मयोगे शिवतोऽनेषो उशकोष्ठले
खन प्रकारकथनं नाम द्वेचे द्विशः पटलः समाप्तः॥ ॥शुभमस्तु॥ ॥संवत् १७७१ वर्षे पौषव
दीपसित्र गुवासरे लिखितमिदं पुस्तकं॥ ॥पं प्राशप्रामसुतजगदीशेन लिखितं॥ ॥ ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥ १॥ कल्याणमस्तु।

॥इति नवकोष्ठ मरणोपायः॥

अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ऌ	ॡ	ए	ऐ	ओ	औ	अं	अः	क	ख	ग	घ	ङ	च	छ	ज	झ	ञ
८	५	८	२	३	४	१	१	६	७	९	४	१	२	३	५	२	३	५	८	४	९	२	३	४	१
ट	ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ	ब	भ	म	य	र	ल	व	श	ष	स	ह	ल	हं	×
७	१	७	६	४	१	२	३	१३	८	५	८	२	११	४	१	७	६	७	६	४	१	२	६	५	×

इत्थं नौ षोडशकोष्ठे नरणोपायस्य प्रार्थं क्रमः। काद्यानवो कानवरादयश्च पाद्याः शशकाद्ह्यादयो ह्यौ॥ १॥ ।शिवः। ।।३३।।